पातज्वरश्वासत्वग्दोषार्शोविषक्रमीन् ॥ कोपयेदामवातञ्च घनसंघातकारणम्, ॥ दाक्षिणो मारुतोबल्यश्चक्षुष्यः शस्यघातकः । मधुरश्चाम्लदाही च कषायानुरसो लघुः ॥ रक्तपित्तप्रशमनो न च मारुतकोपनः । मशकप्रदादिकीटानां जनकः प्राणकारकः, ॥ पाश्चिमोऽग्निवपुर्वर्णबलारोग्यविवर्द्धनः । कषायः शोषणः स्वर्यो रोचनो विशदो लघुः ॥ अपां लघुत्ववैशद्यशैत्यवैमल्यकारकः । सर्व्वद्रव्येष्वभिव्यक्तप्रभावरसवीर्य्यकृत् ॥ व्रणसंरोपणस्त्वच्यो दाहशोषतृषापहः, ॥ औत्तरो मारुतः स्निग्धो मृदुर्मधुर एव च । कषायानुरसः शीतः सर्वदोषप्रकोप(ण:)नः ॥ क्षीणक्षतविषार्त्तानां हितोदाहतृषापहः । शीताधिकः सनीहारः स विद्युत्स्तनयित्नुमान्, ॥ विष्वग्वायुरनायुष्यः प्राणिनां नैकदोषकृत् । सर्वर्त्तुनिन्दको हन्ता कृत्योत्पातपुरःसरः" इति ॥ तालादिव्यजनवायुगुणाः । मूर्च्छादाहतृषास्वेदश्रमघ्नो व्यजनानिलः । तालवृन्तमयो वातस्त्रिदोषशमनो लघुः । वंशव्यजनजो वातो रूक्षोष्णो वातपित्तदः । बालव्यजनमौजस्यं मक्षिकादीन् व्यपोहति ॥ मायूरा वस्त्रजा वैत्रा वाता दोषत्रयापहा" इति ।

सूक्ष्मस्तु वायुः शरीरस्थः प्राणादिभेदेन दशविधः दशविधकार्य्य करणात्। यथोक्तम् वैद्यके "प्राणोऽपानः समानश्चोदानव्यानौ च वायवः । नागः कूर्म्मश्च कृकरो देवदत्तो धनञ्जयः ।। प्राणस्तु प्रथमो वायुर्नराणामधिपः प्रभुः । नित्यमावापयेत् सर्व्वान् प्राणिनामुरसि स्थितः ॥ निःश्वासोच्छ्वासकश्चैव प्राणो जीवं समाश्रितः । प्रसाराकुञ्चनो वायुः प्रकाशो धारणस्तथा ॥ प्राणस्त्वेवंविधं कुर्य्यात् प्राणिनां प्राणधारकः । प्राणनं कुरुते यस्मात् तस्मात् प्राणः प्रकीर्त्तितः । प्राणो हि भगवान् ईशः प्राणो विष्णुः पितामहः । प्राणेन धार्य्यते लोकः सर्वं प्राणमयं जगत् ॥ इन्द्रियाणि प्रवर्त्तन्ते यावत् प्राणानिलो हृदि । नष्टे न दृश्यते सर्वं तस्मात् प्राणन्तु रक्षयेत्, ॥ रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः । गुणबद्धस्तथा जीवः प्राणापानेन कृष्यते, ॥ अपानयंस्तथाहारं मनुजानां यतोऽधमः । शुक्रमूत्रव्रजे वायुरपानस्तेन कीर्त्तितः, ॥ पीतं भक्षितमाघ्रातं रक्तं पित्तकफानिलान् । समं नयति गात्रेषु समानो नाम मारुतः ॥ समानोऽग्निसमीपस्थः कोष्ठे च वाति सर्वतः । अन्नं गृह्णाति पचति विरेचयति मुञ्चति ॥ स्पन्दयत्यधरं वक्त्रं नेत्रगात्रप्रकोप(नः)णः, । उद्वेजयति मर्म्माणि उदानो नाम मारुतः ॥ व्यानोविनामयत्यङ्गं व्यानो व्याधिप्रकोप(नः)णः । प्रीतेर्विनाशकश्चायं वार्द्धकोत्पादकस्त्रिधा इति ॥

प्राणादीनां स्थानानि । "शिरसो नासिकाप्रान्तमुदानस्थानमुच्यते । नाभेः पादतलं यावदपानस्य प्रकीर्त्तितम् ॥ शरीरव्यापको व्यानः प्राणः सकलनायकः । उद्गारे नाग इत्युक्तः कूर्म्मश्चोन्मीलने स्थितः ॥ कृकरः क्षुधिते चैव देवदत्तो विजृम्भिते । धनञ्जयस्थितो मेढ्रे मृतस्यापि न मुञ्चति ॥ भूतावाप्तिस्ततस्तस्याजायतेन्द्रियगोचरात् ॥ उत्साहोच्छ्वासनिःश्वासचेष्टा धातुगतिः समा । समो मोक्षे गतिमतां वायोः कर्म्माविकारजम्" इति सुखबोधः ॥ प्राणादयश्च पञ्चसूक्ष्मभूतरजोगुणेभ्यः समस्तेभ्य उत्पद्यन्ते इति वेदान्तिमतम् सकलेन्द्रियाणां व्यापार एव प्राणो न पदार्थान्तरमिति सांख्यमतं विवरणं प्राणशब्दे दृश्यम् ।

उदानादीनां कर्म्मविशेषा उक्ता यथा "उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः । तेन भाषितगीतादिप्रवृत्तिः कुपितस्तु सः ॥ ऊर्द्धजत्रुगतान् रोगान् विदधाति विशेषतः ॥ यो वायुः प्राणनामासौ मुखं गच्छति देहधृक् ॥ सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते । प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ॥ आमपक्वाशयचरः समानो वह्निसंगतः । सोऽन्नं पचति तज्जांश्च विशेषान् विविनक्ति हि ॥ स दुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि । पक्वाशयालयोऽपानः काले कर्षति चाप्ययम् ॥ समीरणः शकृन्मूत्रशुक्रगर्भार्त्तवान्यधः । क्रुद्धस्तु कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ॥ शुक्रदोषप्रमेहांश्च व्यानापानप्रकोपजान् । कृत्स्नदेहचरो व्यानो रससंव्यूहनो यतः ॥ स्वेदासृक्स्रावणञ्चापि पञ्चधा चेष्टयत्यपि । गत्यपक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः ॥ प्रायः सर्व्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम् । प्रस्यन्दनं चोद्वहनं पूरणञ्च विरेचनम् ॥ धारणञ्चेति पञ्चैतास्चेष्टाः प्रोक्ता नभस्वतः । क्रुद्धः स कुरुते रोगान् प्रायशः सर्वदेहगान् ॥ युगपत् कुपिता एते देहं भिन्द्युरसंशयम् इति च वैद्यके उक्तम् ।

तत्र देहस्थस्य वायोर्विकारहेतुलक्षणादिकमुक्तं वैद्यके "व्यायामादपतर्पणात् प्रपतनाद्भङ्गात् क्षयाज्जागरात् वेगानाञ्च विधारणादतिशुचः शैत्यादतित्रासतः । रूक्षक्षारकषायतिक्तकटुकैरेभिः प्रकोपं व्रजेत् वायुर्वारिधरागमे परिणते चान्नेऽपराह्णेऽपि च" ॥ विकृतवायुलक्षणम् ।